## शार्ङ्गरवाद्यञो ङीन्। (७३/५२७)

शार्ङ्गरवादिभ्योऽञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति। शार्ङ्गरवी। कापटवी। अञन्तेभ्यः – बैदी। और्वी। जातिग्रहणम्[1]त्रानुवर्तते। तेन जातिलक्षणो ङीष् अनेन बाध्यते, न पुंयोगलक्षणः, बैदस्य स्त्री बैदी।

शार्ङ्गरव। कापटव। [2]गौगुलव। ब्राह्मण। गौतम। एतेऽणन्ताः। कामण्डलेय। ब्राह्मकृतेय। [3]आनिचेय। आनिधेय। आशोकेय। एते ढगन्ता। वात्स्यायन। मौञ्जायन। एतौ फगन्तौ जातिः। [4]कैकसेयो ढगन्तः। [5]काव्यशैव्यौ यञन्तौ। एहि, पर्येहि कृदिकारान्तौ। [6]आश्मरथ्यो यञन्तः। औदपानः। [7]उदपानशब्दः शुण्डिकाद्यणन्तः प्रयोजयति। अराल। चण्डाल। वतण्ड[8]। जातिः। '[9]भोगवद्गौरिमतोः सञ्ज्ञायाम् घादिषु नित्यं [10]ह्रस्वार्थम्' (ग. सू. ५६)। 'नृनरयो[11]र्वृद्धिश्च' (ग. सू. ५७)। अत्र यथायोगं ङीबादिषु प्राप्तेषु ङीन् विधीयते॥

## यङश्चाप्। (७४/५२८)

यङन्तात् प्रातिपदिकात् स्त्रियां चाप् प्रत्ययो भवति। ञ्यङः ष्यङश्च सामान्यग्रहणमेतत्। आम्बष्ठ्या। सौवीर्या। [12]कौसल्या। [13]ष्यङ – कारीषगन्ध्या। वाराह्या। बालाक्या।

[३७३] षाच्च यञः। (म. भा. २.२२८)

षात् परो यो यञ् तदन्ताच्च चाप् वक्तव्यः। [14]शार्करक्ष्या। पौतिमाष्या। गौकक्ष्या। उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन [15]वा भविष्यति॥

## आवट्याच्च। (७५/५२९)

अवटशब्दो [16]गर्गादिः, तस्माद् यञि कृते ङीपि प्राप्ते वचनमेतत्। आवट्याच्च स्त्रियां चाप् प्रत्ययो भवति। आवट्या। प्राचां [17]ष्फ एव, सर्वत्रग्रहणात्। आवट्यायनी॥ 4.1.105

## तद्धिताः। (७६/५३०)

अधिकारोऽयम्। आपञ्चमाध्यायपरिसमाप्तेः यानित ऊर्ध्वमनुक्रमिष्यामः तद्धितसञ्ज्ञास्ते वेदितव्याः। वक्ष्यति, 'यूनस्तिः' (४.१.७७/५३१) – युवतिः। बहुवचनमनुक्ततद्धितपरिग्रहार्थम्। 'पृथिव्या ञाञौ' (४.१.८५/१०७७ वा.), 'अग्रादिपश्चाड् डिमच्' (४.३.२३/१३९१ वा.) इत्येवमादि लब्धं भवति। तद्धितप्रदेशाः – 'कृत्तद्धितसमासाश्च' (१.२.४६/१७९) इत्येवमादयः॥

---

1. अत्र चेहानुवर्तते ई. क. ह, चेत्यनुवर्तते इ. 2. गौग्गुलव इ. ब. क. ड. ई, शेयगव ह. 3. आतिथेय ड. 4. कैशौकसेयः क, कैकयः ड, कैसेय ह. 5. काव्यशैत्यौ क, काव्यशैब्यौ ङ्यन्तौ ई. ड. 6. आमरथ्य ह. 7. उदपानशब्दः नास्ति ब. ड. क. ई. ह. 8. वतण्डाजातिः ब. 9. भोजवत् ब, भोगवद् भूरिमतोः क.: 10. ह्रस्वार्थे ई. ब, ह्रस्वार्थं वचनम् ड. 11. वृद्धित्वं ह. 12. नास्ति ह, कौशल्या ड. 13. ष्यङः ब. फ. ई. 14. शाकुराक्ष्या ह, शार्कराख्या क. 15. च अप् क. ड. ह. 16. गर्गादिषु पठचते क. ड. 17. तु इत्यधिकम् इ. ब. क. ड. ई.